# वाराणशि

## बालकाण्डे त्रिचत्वारिंशः सर्गः

देवदेवे गते तस्मिन् सोऽङ्गुष्ठाग्रनिपीडिताम्।
कृत्वा वसुमतीं राम संवत्सरमुपासत।।1.43.1।।
अथ संवत्सरे पूर्णे सर्वलोकनमस्कृतः।
उमापतिः पशुपती राजानमिदमब्रवीत्।।1.43.2।।
प्रीतस्तेऽहं नरश्रेष्ठ करिष्यामि तव प्रियम्।
शिरसा धारयिष्यामि शैलराजसुतामहम्।।1.43.3।।
ततो हैमवती ज्येष्ठा सर्वलोकनमस्कृता।
तदा सातिमहद्रूपं कृत्वा वेगं च दुस्सहम्।।1.43.4।।
आकाशादपतद्राम शिवे शिवशिरस्युत।
अचिन्तयच्च सा देवी गङ्गा परमदुर्धरा।।1.43.5।।
विशाम्यहं हि पातालं स्रोतसा गृह्य शङ्करम्।
तस्यावलेपनं ज्ञात्वा क्रुद्धस्तु भगवान् हरः।।1.43.6।।
तिरोभावयितुं बुद्धिं चक्रे त्रिनयनस्तदा।
सा तस्मिन् पतिता पुण्या पुण्ये रुद्रस्य मूर्धनि।।1.43.7।।
हिमवत्प्रतिमे राम जटामण्डलगह्वरे।
सा कथञ्चिन्महीं गन्तुं नाशक्नोद्यत्नमास्थिता।।1.43.8।।

नैव निर्गमनं लेभे जटामण्डलमोहिता।
तत्रैवाबम्भ्रमद्देवी संवत्सरगणान् बहून्।।1.43.9।।
तामपश्यन्पुनस्तत्र तपः परममास्थितः।
अनेन तोषितश्चाभूदत्यर्थं रघुनन्दन।।1.43.10।।
विससर्ज ततो गङ्गां हरो बिन्दुसरः प्रति।
तस्यां विसृज्यमानायां सप्तस्रोतांसि जज्ञिरे।।1.43.11।।
ह्लादिनी पावनी चैव नलिनी च तथाऽपरा।
तिस्रः प्राचीं दिशं जग्मुः गङ्गाश्शिवजलाश्शुभाः।।1.43.12।।
सुचक्षुश्चैव सीता च सिन्धुश्चैव महानदी।
तिस्रस्त्वेता दिशं जग्मुः प्रतीचीं तु शुभोदकाः।।1.43.13।।
सप्तमी चान्वगात्तासां भगीरथमथो नृपम्।
भगीरथोऽपि राजर्षिर्दिव्यं स्यन्दनमास्थितः।।1.43.14।।
प्रायादग्रे महातेजा गङ्गा तं चाप्यनुव्रजत्।
गगनाच्छङ्करशिरस्ततो धरणिमाश्रिता।।1.43.15 ।।
व्यसर्पत जलं तत्र तीव्रशब्दपुरस्कृतम्।
मत्स्यकच्छपसङ्घैश्च शिंशुमारगणैस्तदा।।1.43.16।।
पतद्भिः पतितैश्चान्यैर्व्यरोचत वसुन्धरा।
ततो देवर्षिगन्धर्वा यक्षसिद्धगणास्तदा।।1.43.17।।
व्यलोकयन्त ते तत्र गगनाद्गां गतां तथा।
विमानैर्नगराकारैर्हयैर्गजवरैस्तदा।।1.43.18।।

# बाल काण्डे चतुश्चत्वारिंश: सर्ग:

स गत्वा सागरं राजा गङ्गयाऽनुगतस्तदा ।
प्रविवेश तलं भूमेर्यत्र ते भस्मसात्कृता:।।1.44.1।।
भस्मन्यथाऽप्लुते राम गङ्गायास्सलिलेन वै।
सर्वलोकप्रभुर्ब्रह्मा राजानमिदमब्रवीत्।।1.44.2।।
तारिता नरशार्दूल दिवं याताश्च देववत्।
षष्टि: पुत्रसहस्राणि सगरस्य महात्मन:।।1.44.3।।
सागरस्य जलं लोके यावत्स्थास्यति पार्थिव।
सगरस्यात्मजास्तावत्स्वर्गे स्थास्यन्ति देववत्।।1.44.4।।
इयं च दुहिता ज्येष्ठा तव गङ्गा भविष्यति ।
त्वत्कृतेन च नाम्नाऽथ लोके स्थास्यति विश्रुता।।1.44.5।।
गङ्गा त्रिपथगा राजन् दिव्या भागीरथीति च।
त्रीन् पथो भावयन्तीति ततस्त्रिपथगा स्मृता।।1.44.6।।
पितामहानां सर्वेषां त्वमत्र मनुजाधिप ।
कुरुष्व सलिलं राजन् प्रतिज्ञामपवर्जय।।1.44.7।।
पूर्वकेण हि ते राजंस्तेनातियशसा तदा।
धर्मिणां प्रवरेणापि नैष प्राप्तो मनोरथ:।।1.44.8।।
तथैवांशुमता तात लोकेऽप्रतिमतेजसा।
गङ्गां प्रार्थयतानेतुं प्रतिज्ञा नापवर्जिता।।1.44.9।।
राजर्षिणा गुणवता महर्षिसमतेजसा।
मत्तुल्यतपसा चैव क्षत्रधर्मस्थितेन च।।1.44.10।।

दिलीपेन महाभाग तव पित्राऽति तेजसा।
पुनर्न शङ्किताऽनेतुं गङ्गां प्रार्थयताऽनघ।।1.44.11।।
सा त्वया समनुक्रान्ता प्रतिज्ञा पुरुषर्षभ।
प्राप्तोऽसि परमं लोके यशः परमसम्मतम्।।1.44.12।।
यच्च गङ्गावतरणं त्वया कृतमरिन्दम।
अनेन च भवान् प्राप्तो धर्मस्यायतनं महत्।।1.44.13।।
प्लावयस्व त्वमात्मानं नरोत्तम सदोचिते।
सलिले पुरुषव्याघ्र शुचिः पुण्यफलो भव।।1.44.14।।
पितामहानां सर्वेषां कुरुष्व सलिलक्रियाम्।
स्वस्ति तेऽस्तु गमिष्यामि स्वं लोकं गम्यतां नृप।।1.44.15।।
इत्येवमुक्त्वा देवेशः सर्वलोकपितामहः।
यथाऽऽगतं तथाऽगच्छत् देवलोकं महायशाः।।1.44.16।।
भगीरथोऽपि राजर्षिः कृत्वा सलिलमुत्तमम्।
यथाक्रमं यथान्यायं सागराणां महायशाः।।1.44.17।।
कृतोदकश्शुची राजा स्वपुरं प्रविवेश ह।
समृद्धार्थो रघुश्रेष्ठ स्वराज्यं प्रशशास ह।।1.44.18।।
प्रमुमोद ह लोकस्तं नृपमासाद्य राघव।
नष्टशोकस्समृद्धार्थो बभूव विगतज्वरः।।1.44.19।।
एष ते राम गङ्गाया विस्तरोऽभिहितो मया।
स्वस्ति प्राप्नुहि भद्रं ते संध्याकालोऽतिवर्तते।।1.44.20।।

धन्यं यशस्यमायुष्यं पुत्र्यं स्वर्ग्यमतीव च।
यश्श्रावयति विप्रेषु क्षत्रियेष्वितरेषु च।।1.44.21।।
प्रीयन्ते पितरस्तस्य प्रीयन्ते दैवतानि च।
इदमाख्यानमव्यग्रो गङ्गावतरणं शुभम्।।1.44.22।।
यश्शृणोति च काकुत्स्थ सर्वान् कामानवाप्नुयात्।
सर्वे पापाः प्रणश्यन्ति आयुः कीर्तिश्च वर्धते।।1.44.23।।

---